# .. Tripura Upanishad ..

## ॥ ત્રિપુરોપનિષત્ ॥

### Document Information


Text title : Tripura Upanishad

File name : tripura-upan.itx

Category : upaniShat

Location : doc_upanishhat

Author : Vedic Tradition

Language : Sanskrit

Subject : philosophy/religion/hinduism

Transliterated by : Kannan Subramanian

Proofread by : P.P.Narayanaswami (swami at math.mun.ca)

Description-comments : 82/108; Rig-Veda, Shakta Upanishad

Latest update : September 28, 1999, July 2, 2011

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.


August 3, 2016

*sanskritdocuments.org*

# ॥ ત્રિપુરોપનિષત્ ॥

ત્રિપુરોપનિષદ્વેદ્યપારમૈશ્વર્યવૈભવમ્ ।
અખણ્ડાનન્દસામ્રાજ્યં રામચન્દ્રપદં ભજે ॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા । મનો મે વાચિ પ્રતિષ્ઠિતમ્ ।
આવિરાવીર્મ એધિ । વેદસ્ય મ આણીસ્થઃ । શ્રુતં મે મા પ્રહાસીઃ ।
અનેનાધીતેનાહોરાત્રાન્ સંદધામિ । ઋતં વદિષ્યામિ ।
સત્યં વદિષ્યામિ । તન્મામવતુ । તદ્વક્તારમવતુ । અવતુ મામ્ ।
અવતુ વક્તારમ્ । અવતુ વક્તારમ્ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ તિસ્રઃ પુરાસ્ત્રિપથા વિશ્વચર્ષણા અત્રાકથા અક્ષરાઃ
સન્નિવિષ્ટાઃ ।
અધિષ્ઠાયૈના અજરા પુરાણી મહત્તરા મહિમા દેવતાનામ્ ॥ ૧॥

નવયોનિર્નવચક્રાણિ દધિરે નવૈવ યોગા નવ યોગિન્યશ્ચ ।
નવાનાં ચક્રા અધિનાથાઃ સ્યોના નવ મુદ્રા નવ ભદ્રા મહીનામ્ ॥ ૨॥

એકા સા આસીત્ પ્રથમા સા નવાસીદાસોનવિંશાદાસોનત્રિંશત્ ।
ચત્વારિંશાદથ તિસ્રઃ સમિધા ઉશતીરિવ માતરો મા વિશન્તુ ॥ ૩॥

ઊર્ધ્વજ્વલજ્વલનં જ્યોતિરગ્રે તમો વૈ તિરશ્ચીનમજરં તદ્રજોઽભૂત્ ।
આનન્દનં મોદનં જ્યોતિરિન્દો રેતા ઉ વૈ મણ્ડલા મણ્ડયન્તિ ॥ ૪॥

તિસ્રશ્ચ [ યાસ્તિસ્રો ] રેખાઃ સદનાનિ
ભૂમેસ્ત્રિવિષ્ટપાસ્ત્રિગુણાસ્ત્રિપ્રકારાઃ ।
એતત્પુરં [ એતત્ત્રયં ] પૂરકં પૂરકાણામત્ર [
પૂરકાણાં મન્ત્રી ] પ્રથતે મદનો મદન્યા ॥ ૫॥

મદન્તિકા માનિની મંગલા ચ સુભગા ચ સા સુન્દરી સિદ્ધિમત્તા ।
લજ્જા મતિસ્તુષ્ટિરિષ્ટા ચ પુષ્ટા લક્ષ્મીરુમા લલિતા લાલપન્તી ॥ ૬॥

ઇમાં વિજ્ઞાય સુધયા મદન્તી પરિસૃતા તર્પયન્તઃ સ્વપીઠમ્ ।
નાકસ્ય પૃષ્ઠે વસન્તિ પરં ધામ ત્રૈપુરં ચાવિશન્તિ ॥ ૭॥

કામો યોનિઃ  કામકલા વ્રજપાણિર્ગુહા હસા માતરિશ્વાભ્રમિન્દ્રઃ ।
પુનર્ગુહા સકલા માયયા ચ પૂરુચ્યેષા વિશ્વમાતાદિવિદ્યા ॥ ૮॥

ષષ્ઠં સપ્તમમથ વહ્નિસારથિમસ્યા મૂલત્રિકમા દેશયન્તઃ ।
કથ્યં કવિં કલ્પકં કામમીશં તુષ્ટુવાંસો અમૃતત્વં

ભજન્તે ॥ ૯॥

ત્રિવિષ્ટપં ત્રિમુખં વિશ્વમાતુર્નવરેખાઃ સ્વરમધ્યં તદીલે ।
[ પુરં હન્ત્રીમુખં વિશ્વમાતૂ રવે રેખા સ્વરમધ્યં તદેષા । ]
બૃહત્તિથિર્દશા પઞ્ચાદિ નિત્યા સા ષોડશી પુરમધ્યં બિભર્તિ ॥ ૧૦॥

યદ્વા મણ્ડલાદ્વા સ્તનબિંબમેકં મુખં ચાધસ્ત્રીણિ ગુહા સદનાનિ ।
કામી કલાં કામ્યરૂપાં વિદિત્વા [ ચિકિત્વા ] નરો જાયતે
કામરૂપશ્ચ કામ્યઃ [ કામઃ ] ॥ ૧૧॥

પરિસૃતમ્ ઝષમાદ્યં [ ઝષમાજં ] ફલં ચ
ભક્તાનિ યોનીઃ સુપરિષ્કૃતાશ્ચ ।
નિવેદયન્દેવતાયૈ મહત્યૈ સ્વાત્મીકૃતે સુકૃતે સિદ્ધિમેતિ ॥ ૧૨॥

સૃણ્યેવ સિતયા વિશ્વચર્ષણિઃ પાશેનૈવ પ્રતિબધ્નાત્યભીકામ્ ।
ઇષુભિઃ પઞ્ચભિર્ધનુષા ચ વિધ્યત્યાદિશક્તિરરુણા વિશ્વજન્યા ॥ ૧૩ ॥

ભગઃ શક્તિર્ભગવાન્કામ ઈશ ઉભા દાતારાવિહ સૌભગાનામ્ ।
સમપ્રધાનૌ સમસત્વૌ સમોજૌ તયોઃ શક્તિરજરા વિશ્વયોનિઃ ॥ ૧૪॥

પરિસ્રુતા હવિષા ભાવિતેન પ્રસઙ્કોચે ગલિતે વૈમનસ્કઃ ।
શર્વઃ સર્વસ્ય જગતો વિધાતા ધર્તા હર્તા વિશ્વરૂપત્વમેતિ ॥ ૧૫॥

ઇયં મહોપનિષત્ત્રૈપુર્યા યામક્ષરં પરમો ગીર્ભિરીટ્ટે ।
એષર્ગ્યજુઃ પરમેતચ્ચ સામાયમથર્વેયમન્યા ચ વિદ્યા ॥ ૧૬॥

ૐ હ્રીમ્ ૐ હ્રીમિત્યુપનિષત્ ॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા । મનો મે વાચિ પ્રતિષ્ઠિતમ્ ।
આવિરાવીર્મ એધિ । વેદસ્ય મ આણીસ્થઃ । શ્રુતં મે મા પ્રહાસીઃ ।
અનેનાધીતેનાહોરાત્રાન્ સંદધામિ । ઋતં વદિષ્યામિ ।
સત્યં વદિષ્યામિ । તન્મામવતુ । તદ્વક્તારમવતુ । અવતુ મામ્ ।
અવતુ વક્તારમ્ । અવતુ વક્તારમ્ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ઇતિ ત્રિપુરોપનિષત્ ॥

.. Tripura Upanishad ..

was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*